This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2969

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
मानशोकी वानशास्त्र		[illegible]	[illegible]	-	3/12	34	संस्कृत	कागद	11	61		

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं॰ ध॰ टी॰ १

श्रीगणेशायनमः नत्वागणेश्वरंदेवंशारदांगुरुमात्मनः आशौचसंग्रहंविंशत्श्लोकाव्याख्याकरोम्यहम् ॥ १ ॥ अत्रस्मार्तैकमनुद्दिश्यश्लोकप्रसिद्धक्रममनुसरन्गर्भविपत्तिनिमित्ताशौचमुक्त्वेणाशौचंप्रतिपाद्यति २ यरामासेति ॥ अस्यायमन्वयः षण्मासाभ्यंतरेषुषण्मासानामभ्यंतरेमध्येषुस्वपुरुषनिहितेभर्तर्यरेगर्भेमात्रेअर्द्धाद्वयवेगर्भेविनष्टेच्युतेमाताजननीतन्मासंख्यासमदिनंतेषांमासानांगर्भधारणादारभ्यप्रत्येकंयायासंख्यासमानिदिनानियस्मिन्कालेतमितिसमासे अथाचायमर्थःगर्भधारणमासमादिंकृत्वायस्मिन्मासाभ्यंतरेगर्भेविनष्टेतन्मासंख्यासमदिनानीति अत्रयद्यपित्रविशेषेणोक्तंतथापिचतुर्थमासमा

श्रीगणेशायनमः षण्मासाभ्यंतरेषुस्वपुरुषनिहितेगर्भमात्रेविनष्टेमाताततन्मासंख्यासमदिनमशुचिःस्नानशुद्धाःसपिंडाः त्रीतेमासद्वयेतुत्रिदिनमशुचयोऽतःपरंसूतिवत्स्याज्जातुर्वर्णेस्वनुत्पंभवतिवयसियत्प्रोच्यतेशौ

चमात्रं १

रात्रमेवमातुःसपिंडानांतुनाशौचंतथाचमरीचिःगर्भस्रुत्यांयामासमचिरेखुतमेवपश्चात्त्रिरात्रंमासत्रयेउत्तमेवाह्नराजातौत्रयोदिवसाश्चाशौचहेतवःसुःमासत्रयेत्वहमिति गौतमोक्तेःस्मृत्यंतरेपि स्त्रीवमातुस्त्रिरात्रंस्यात्सपिंडाशौचवज्जेनमिति एवंमातुराशौचमभिधायसपिंडानामाहस्नानशुद्धाइति सपिंडाःसप्तपुरुषावसानाःस्नानेनशुद्धाःस्युःसद्यःशौचंसपिंडानांगर्भस्यपतनेसतीतिस्मरणात् एवंसपिंडानांचतुर्थमासादित्रयेत्रविशेषेणास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यःशौचेप्राप्तेपंचमषष्ठयोर्विशेषमाह त्रैवार्षिकेति षण्मासानांमध्येयत् त्रैवार्षिकमर्द्धंपंचमषण्मासाख्यंतत्रसपिंडास्त्रिदिनमशुचयःसुरिति संबंधःपतेमातुर्यथामासंपित्रादीनांदिनत्रयमितिस्मृतेः अत्रपातःपंचमषष्ठ्यारितिवचनात् पातशब्दःपंचषष्ठमासोपलक्षणपरःअतःषण्मासाद्ध्वं सप्तमाष्टममासयोः स्मृतिवत्स्यात् आशौचमितिशेषः स्मृतिःप्रसवोजननंतत्रेतिस्मृतिवत् प्रसवनिमित्तंदशाहंनान्यमिति यावत् स्मृतेर्दशाहाशौचनिमित्तता दशाहंशवमाशौचंसपिंडैर्विधीयते जननेप्येवमेवस्यान्निपुणंशुद्धिमिच्छतामितिमनुक्ताप्रसिद्धा तथाचस्मृतिः षण्मासाभ्यंतरंगर्भेस्रावोभवेद्यदि तदामासस्यमेतासांदिवसैःशुद्धिरिष्यतेत्रितऊर्द्धंस्वजात्युक्तासामाशौचमिष्यतइति तथाहारीतोपिजातमात्रेमृतेमृतजातेवासपिंडानांदशाहमिति एतस्मिंश्चानुवर्णसाधारणतामाहचानुवर्णेषुस्वतुल्यमिति एतदाशौचंसच्चतुर्णांवर्णानांतुल्यंसाधारणंभवति नात्रकश्चनवर्णोक्तोविशेषःननकेवलमिदमेवतुल्यंवयोवस्थाविशेषोपरनिमित्तमपीत्याह वयसीति यद्योर्विशेषोपरतिनिमित्ताशौचंवर्णविशेषोपादनराहित्येनविहितंतदपिचानुवर्णसर्वेषुस्तुल्यंभवति तद्यथैकव्याघ्रपादमुनिनातुल्यंवयसिसर्वेषांऋषिकांतेतथैववचेति अत्रस्वप्रसूतिनिहितेजननीव्यतिरिक्तानामाशौचाभावोध्वनितः १ द्रष्टव्यंपूर्णाप्रसूवनिमित्ताशौचंहिमीयसूत्रेनाहजन्माशौचांतरालेजन्मशौचमध्येनालवृद्ध्यूर्द्ध्वंबालेनालछेदनानंतरंयदिशिशोर्नेशनमुपरमस्यान्न अथवानिःप्राणःप्राणरहितोनिःपतेत्निर्गच्छेत् तदाजननंजनि तज्जन्मनिमित्तंस्याशौचंबलत्वंपूर्णेमरणेवनशवाशौचेनजननाशौचनिवृत्तिः किंतुजन्माशौचेनैवशिष्टपरमनिमित्ताशौचनिवृत्तिरितिभावःतद्वंचहन्मनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः ध्र
टी २
नादशाहाभ्यंतरेबालेप्रमीतेतत्सबांधवैःशावाशौचंनकर्तव्यंसूत्वाशौचंविधीयतइतिचेत् यदिचेज्जननानंतरंनालछेदनात्
प्राक्निधनमुपगतःतर्हिसर्वेषांपित्रादिनांत्र्यहेशौचशुद्धिःस्यादितिशेषः इहचविषयेसूतिकायाःमातुस्तुसकलंकंसंश्रयेदशा
हंमरणनिमित्तंस्यात् शावशुद्धिस्तुसद्यःप्रसवनिमित्तमेवभवतिनशावनिमित्तमितिभावःजीवज्जातोयदितोमृतःसूतकंरक्षतु
इतिवचनात् २एवंकालविशेषेणादशाहाद्याशौचापवादमभिधायवयोवस्थाविशेषादपितदपवादंदर्शयतीयत्नेनाहस्नानंप्रा
ङ्नाभिछेदनाच्चेन्निधनमुपगतस्तत्र्यहेशौचशुद्धिःसर्वेषांसूतिकायास्त्विहचसकलंकंप्रेतशुद्धिस्तुसद्यः"
गिति नामतःप्राक्नामकरणात्पूर्वंपरेतेउपरतेबालेस्नानंस्नानमात्रंनतन्निमित्तमाशौचंप्राक्नामकरणात्सद्यःशुद्धिरितिशंख
स्मृतेःनामकरणाद्दूर्द्धंदशनजननतोदंतजननात्त्रयोक्परेतेप्रेतेत्र्यहिरग्धेत्र्यहःएकरात्रंत्र्यहस्त्वदत्तकन्यासुबालेषुचविशोध
नमितियाज्ञवल्क्यवचनात् त्रिरग्धेतुसद्यःशुद्धिःस्नानमात्रंप्राग्दंतजननात्सद्य इतिवचनात्तदुपरिदिनमात्रंवदंतश्चौलशून्येतदु
परिदंतोद्गमाद्दूर्द्धंयावत् त्रिवर्षंचूडाकरणरहितेपरेतेदिनमेकाहंश्राद्धंचौलान्निशिकीस्मृतेतिवचनात् कृतचौलेतुत्रिरात्रमि
त्याह सचौलइति सचौलेकृतचौलेपरेतेत्रिरात्रं निकृत्तचौलकानांतुत्रिरात्रात् शुद्धिरित्यत्रइतिमनुवचनात् वर्षत्रयानंतरं

पावडपनयनं त्रिरात्रमित्याह त्रिदिनमितरथाप्यावृतादि इतरथा च कृतचौलेऽपि शरदात् कृतचौलेपि संस्थिते तदपरि
मैत्र यावद्वै उपनयनात् प्राक् त्रिरात्रं तथायमर्थः इतरथा शब्देन कृतचूडस्य यावदुपनयनं त्रिरात्र मकृतचौ
लस्यापि यावदुपनयनं त्रिरात्रमिति त्रिरात्रमादेशादिति वचनात् एवं वयोवस्थाविशेषेण शौचविशेषमभिधायजात्या
शौचमाह जात्याशौचमिति तदुपरि उपनयनानंतरं जात्याशौचं दशाहादिकमिति यावत् दशरात्रमतंपरमितिवचनात्।
एवमविशेषेण अजातदंतमरणमातापित्रोः सद्यःशौचादिमाह तदपवादमाह मातापित्रोस्तूपनयनात्प्राक्त्रिरात्रम्

स्नानंश्राद्धमतोवाग्दशनजननतोहःपरेतेत्रिदण्डे तूष्णेत्वन्नापिसद्यस्तदुपरिदिनमाद्यं दंतश्मश्रुलूनेषु
एचौलेतु त्रिरात्रं त्रिदिनमितरथाप्यावृताद्यात्यशौचं मातापित्रोस्तूपुत्रे त्रिदिनमदर्शने सन्निधौनष्टचेष्टे

दंते मृतेमातापित्रोस्त्रिरात्रमेववाक्षानांत्वजातदंतानांत्र्याहाच्छुद्धिरितिकाश्यपवचनात् वैजिकादभिसंबंधादस्तुरुंधादष्टांत्र्यहमिति
स्मृत्यंतराच्च एतत्सर्वं स्नानंश्राद्धमतोर्ध्वंतद्दशनजननतोहःपरेतेस्त्रादिनोक्तोःसंनिधौशिशुमरणेवेदितव्यमित्याह सन्निधौ
नष्टचेष्टइति सन्निधौसमीपेनष्टचेष्टायस्यतस्मिन्मृतइतियावत् त्वरुन्निधोतशिशुमरणेतिकोताशौचमेतन्नभवतीतिभाव
तउक्तंव्याघ्रपादमुनिनाउपनीतेतुविशमंतस्मिन्नेवातिकालजमिति मूढस्योपनयमस्यानीयविवाहात्पूर्वं त्रिरात्रंतदूर्ध्वंदश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हानिज्ञेयं ३ अथचतुर्थेदृतंउनद्व्यब्देति तत्राद्यर्द्धेपद्यसापमर्थंःजन्मनःउर्ध्वेउनद्व्येअसूर्णाद्विवर्षअसंज्ञेगतसंज्ञेमृतइति यावत् जनिकरःपिताजननीमातासोदराभ्रातरस्तेषांदशाहमाशौचमित्येकंपक्षःगर्भस्थेप्रेतेमातुर्दशाहंजातेउभयोःक्षतेनाग्नि सोदरणामितियेंगवचनात पक्षांतरमाह यद्वेति अथवापित्रादित्रयस्यत्रिरात्राशौचेऽस्पशात्वमेवाधिकंतत्रपक्षेसूतकंकर्मो नधिकारिलक्षणंत्रिरात्रंसपिंडैःसहसमानेमितिभावःएतच्चपक्षद्वयंत्रिरात्रंदशरात्रंवाशावमाशौचमिष्यतेउनद्विवर्षेउभयोः सूतकंमानुषेवहीत्येतत्व्याख्यानंसमयेविज्ञानेश्वराचार्यैःसहोक्तंतथास्त्रीषुवयोवस्थाविशेषादाशौचविशेषमाविःकरो

ऊनद्व्यब्देत्वसंज्ञेजननीसोदराणांदशाहंयद्वासपिण्डत्वमेवाधिकमिहविषयेसूतकंतुत्रिरात्रं स्त्रीषुस्त्रीननशुद्धेत्रिपुरुषविधयेज्ञातिरष्टौस्कालास्वांम्वाग्दानतोन्हात्रिभिरुपयमनाभ्दर्तृगोत्रंस्वकंच ॥

तिउत्तरार्द्धेनस्त्रीषुइतिनामकरणार्द्धेष्टौरकालावाग्यावत् स्त्रीरकालंमृतासुस्त्रीषुकन्यासुत्रिपुरुषं अमाप्तानांतुस्त्रीणांत्रिपुरु षीविज्ञायतइतिवसिष्ठोक्तमभिप्रेत्यैतच्चसद्यःशौचंअचूडायांचकन्यायांसद्यःशौचंविधीयतेइतिश्रापस्तंबोक्तंज्ञेयं चूडाकर णादनंतरंवाग्दानात्स्वीकृत्यचाहएकोहनज्ञातिःशुद्धेदितिपूर्वेणसंबंधःअहस्त्वदत्तकन्यासुवालेषुचविशोधनमितिस्मरणात् रामः ३
त्रिभिरुपयमनात्वाग्दानोर्द्धेउपयमनात्विवाहात्अवोढभर्तुःपरिणेतुःगोत्रंस्वकंचपितुर्गोत्रिभिर्दिनैःशुद्धात्स्यंचशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विःस्त्रीणामसंस्कृतानांनात्रहात्रुध्यंतिबांधवाःयथोक्तेकालेनशुद्ध्यंतितुसनाभयइतिमनूक्तावेदितव्या मरणोत्पन्नीतस्यमातापित्रो
रनाहृतःदशाहाशौचपक्षोयंचिरंतननिबंधभिः ४ स्वंचतुर्वर्णसाधारणंशुद्धिमुक्त्वावर्णविशेषेणदशाहाशौचापवादं पंचमवृत्तप्र
वीहेणाह जन्मनीति जन्माशौचे उपेतःउपनीतःकृतोपवीतसंस्कारःउपेतएवौपेतःतस्मृतौउपनीतादिमरणेचब्राह्मणाद्याश्च
त्वारोवर्णाःक्रमेणादशनिशद्विकालमशुचयःस्युःवाह्मणोदशाहं क्षत्रियोद्वादशाहं वैश्यःपक्षंपंचदशाहं शूद्रोमासं पक्षद्वयंर
तिक्रमःउचितकृतुपाकयज्ञहिंसुश्रुषादिविहितकर्मानुष्ठानशीलःशूद्रःपक्षंपंचदशरात्रमेवाशुचिर्नेनुमासंसर्वेषामेवस्वरणांनोह

जन्मन्योपेतमृत्यावपिचदशनिशाद्वादशाहानिपक्षंमासंधर्मांक्रमेणाशुचयउचितकृच्छ्रहृज्जातिरूपक्षं
वानप्रस्थे यतौचोपरमतिकुलजेपंडकेत्वात्मवःस्याद्योविद्वोविप्रणष्टेमृतवतिचदिनंयद्विद्वे चसद्यः थ

तकेमृतसूतके दशाहान्नुद्धिरेतेवा मितिशातातपोक्तेत्रीतत्रतिटीकांतरेउपाधिवशात्संकोचः स्नातस्यद्वादशाहानिविशःपंचदशैव
तु त्रिंशद्दिनानिशूद्रस्यतदर्द्धन्यूनवर्तिनइतियाज्ञवल्क्यवचनात् इदानीमुत्तरार्द्धेनकुलस्त्रीवेविशेषोपरमेदशाहाद्याशौ
चापवादमाह वानप्रस्थइति कुलजेस्ववंश्येवानप्रस्थेतृतीयाश्रमिणिमतौपंचचतुर्थाश्रमिणिपंडकेक्लीवेचोपरमतिउपरते आत्म
वःस्नानमात्रंशुद्धिकारणमिति योवि द्वोविप्रणष्टेतद्रक्षणायमृतवति दिनमहोरात्रमाशौचं यद्विद्वेसाक्षात् यद्विद्वेतुसद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नानमावेरणाशुद्धिरितिपूर्वेणासंबंधःषड्यातेनकालांतरस्मृतेरिति नुदिनमेवशुद्धिहेतुःबाह्मणार्थेविपन्नाये योबिंदुगोयरेपिवा
ग्राहवेचहतानांवाएकरात्रमशौचकमितिस्मृतेःउद्यतेरहवेशस्त्रे स्नत्वधर्महतस्यचसद्यःसंतिष्ठतेयस्तस्याशौचमितिस्थिति
रितिमनुवचनात् ५ एतत्स्नातमेवाशुद्धिनिमित्तमितिवृद्धैर्नीतमतोस्तावानंतरमुत्सर्गतोदशाहाद्याशौचप्राप्तौ घत्तिरेशका
लादिभेदेनुतदपवादमाह षष्ठहतेन शवेतीतरति शवेशवाशौचेदशाहात् प्रभृतिदशाहादिकेव्यतिते व्यतिक्रांते दशदिनानं
तरंस्नातयतियावत् विषयकरतियस्मिन्देशेमृतिस्तत्रैवस्तायते त्रिमासान्याकृप्रथममासत्रयेत्रिरात्रं त्रिमासानंतरंत्र्याषरमासा

शवातीतेदशाहात्प्रभृतिविषयकेप्राक्त्रिमासात्त्रिरात्रंपक्षिराया
षष्ठमासाद्दिनमिहनवमात्स्यात्ततःस्नानमात्रं ॥ ॥

त्षरमासंयावत् पक्षिणीषूर्वापरदिनाभ्यांयुक्तारात्रिशुद्धिनिमित्तं षरमासाद्दशंयावन्नवमासपर्यंतंदिनमहोरात्रं ततोनवम
मासाद्दशंस्नानमात्रंस्यादितिसंबंधः देशांतरमृतिश्चवरोऽविशेषेणात्रिमासादावपिस्नानंभवत्येवेत्याह स्नानंदेशांतरस्य

इति मास्त्र ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत्रिरात्रंस्यात्षण्मासेपक्षिणीतथा अहरूनवमादर्वाक्उद्धरेत्स्नानेनशुद्ध्यतीति वृद्धवसिष्ठवचनात् देशांतरमृतंश्रुत्वा क्रीवैवै
स्वानसेमृतौ मृतेस्नानेनशुद्धातिगर्भस्रावेचगोत्रिरा इतिसमंपंतराच्चदेशांतरस्थस्यांत्याहरहःस्मृतिः चत्वारिंशद्दंत्यन्येत्रिंश
दन्येतथैवचेतिच एतस्याप्यपवादमाह अथपित्रविषयइति देशकालाविशेषात् सर्वदेशेसर्वकालेचपितृमातृश्वसृसुतानां
स्वंस्वंसजातिविहितंदशाहिकमेव पित्रविषयइत्यत्रपिताचमाताचपितरौतौविषयोयस्येतिसमासः पितरौचेन्मृतौस्यातां द्व्रहो
पिहिपुत्रकःस्यात्तदाहिनमारभ्यदशाहंसूतकीभवेत् इतिवचनात्उपमातुःविशेषमाह मातुःसपत्न्यास्त्रिदिनमिति अपरमाह

स्नानमात्रं स्नानंदेशान्तरस्थेत्वथपित्रविषयेदेशकालाविशेषात्स्वंमातुःसपत्न्यास्त्रिदिनमिदमतिक्रां
त्यशौचंसमानं ६

रिमृतायांपुत्रस्यदेशकालविशेषेणानवममासाद्ध्वंत्रिरात्रं तदूर्ध्वंपित्रपत्न्यामपेतायांमातृवत्त्रेहिजो
तम संवत्सरेक्रांतेतुत्रिरात्रमशुचिर्भवेत् इति अत्रशावशब्दग्रहणानुवृत्तिर्नास्तीतेजननाशौचेशुद्धिनेवेति सूचितंयथोक्तंतथा
चोक्तंनाशुद्धिःप्रसवाशौचेव्यतीतेषुदिनेष्वपि इतिदेवलेनोक्तं एतदतिक्रांताशौचंसर्ववर्णसाधारणमित्याह इदमतिक्रांताशौ
चंसमानमिति इदंस्मृतिक्रांतिरतिक्रमःतत्संबद्धंशौचंतत्समानंसर्ववर्णसाधारणमित्यर्थः प्रोषितेकालाविशेषःस्यादशेषे
ऽहमेवहि सर्वेषांवत्सरेपूर्णेप्रेतदत्तोदकंशुचिरितिवचनात् तुल्यंवयसिसर्वेषांअतिक्रांतेतथैवचेतिव्याघ्रपात्स्मृतेश्च ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसकुलोत्पन्नमृताशौचमुत्काङ्कलांतरप्रितानांत्रपिमृतानांत्राशौचमाह सप्तमात्रिभिर्दिनैःपित्रोरित्यादिभिःपित्रोःमाता
पित्रोर्गेहेसमूढाप्रसवमरणायोःसम्यक्उढायाःपरिणीतायाःयेप्रसवमरणेतयोःपित्रादेनांक्रमादेकरात्रित्रिरात्रेस्यातांप्रसवेएक
रात्रंमरणेत्रिरात्रमित्यर्थःअत्रपित्रोर्गेहइत्यनेनभर्तृगेहेप्रसूतायाःमृतायाश्चापित्रपक्षाणांसर्वेषांत्राशौचाभावोदर्शितःतथाच
विष्णुवचनं संस्कृताप्रस्त्रीष्वनाशौचं च पितृपक्षेतत्प्रसवमरणे चेत्पितृगेहेस्यातांतादेकरात्रंत्रिरात्रंचेति अथपितृमरणेमूढपुत्र्या
स्त्रिरात्रमित्यत्रनाथशब्देनाधिकारांतरसूचनाम्यूढपुत्र्याःपरिणीतकन्यायाःपितृमरणेमातापित्रोर्मरणेत्रिरात्रंपित्रोरुपरुमेस्त्री

पित्रोर्गेहेसमूढाप्रसवमरणायोरेकरात्रत्रिरात्रेस्यातांपित्रादिकानामथपितृमरणेमूढपुत्र्यास्त्रिरात्रं॥
प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्श्वसयाज्यसस्त्रीयेषुत्रिरात्रंत्रिरिवसमशुचिःसोदकसूभ

यत्र ७
गामूढानांचकथंभवेत् प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्तायाज्यसस्त्रीयेषुत्रिरात्रंउपनयनपूर्वंकंवेदा
ध्यापकःचाचार्यःएकशाखाध्यापनक्षमःश्रोत्रियःऋत्विक्त्राध्वर्यवादिकमेकृत्सएवंयाज्यःयजमानसहितःशेषाःप्रसिद्धाःए
मृतेषुत्रिरात्रंसोदकसूभयत्रेति सप्तमसमानोदकःसप्तपुरुषानंतरंसप्तपुरुषावसानःउभयत्रजाताशौचेमृताशौचेचत्रिरिवसमेवा
शुचिंत्रशुद्धःस्यात् यथोहरहस्पतिःअहंमातामहाचार्यश्रोत्रिष्वशुचिर्भवेत् इति प्रचेताश्चमृतेचर्त्विजियाज्येचत्रिरात्रेणशुध्यतीत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति वृद्धयाज्ञवल्क्योपिसंस्थिते पक्षिणीरात्रिंदोहित्रेभगिनीसुते संस्कृतेतुत्रिरात्रंस्यादेवधर्मोव्यवस्थितइति मनुरपिजन्मन्येकोदका
नांतत्रिरात्राच्छुद्धिरित्याह शवस्पर्शेविशुद्ध्यंतित्र्यहात्सदकदाहनइति ७ अथमरणे पक्षिण्याशौचमिति ऋत्विगादयोभागिनेयांता
प्रसिद्धाःतेषांप्रयाणेमृत्यावितियावत् मातामह्यांचविरतायांमृतायांपित्रोःस्वसरिमातृष्वसरिपितृष्वसरिच विरतायांमातुलेचविरते
मातुलान्यामातुलपत्न्यांचविरतायां पक्षिणीत्र्याशौचं त्र्याशौचकरणं त्र्यथोसज्योतिरिति स्वविषयनृपतौस्वदेशाधिपतौनेष्टमृतेग्राम
नाथेस्वग्रामाधीशेचनष्टेसज्योतिरेवकालशुद्धिहेतुःसमानज्योतिरादित्योनक्षत्रंवापस्मिन्सज्योतिःदिवानष्टेयावत् सूर्यदर्शनंतावत्

पक्षिण्याशौचमृत्विग्दुहित्सुतसहाध्यापिबंधुत्रयांतेवासिस्वश्रूसुमित्रःश्वशुरभगिनिकाभागिनेयप्र
याणेमातामह्यांचपित्रोःस्वसरिचविरतेमातुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथे
चनष्टे ८

दशुचिःनक्षत्रदर्शनाच्छुद्धिःरात्रिनष्टेतुरात्र्यवसानपर्यंतमेवाशुद्धिरित्यर्थः त्रयेषांपूर्ववृत्तेत्रिरात्रमुक्तंतैःपुनःप
क्षिणीकथनंदेशकालातिभेदतोव्यवस्थापनीयं ततस्पक्षिण्यभिधानस्यश्वशुरयोश्चभगिन्यांमातुलान्यांचमातुलेपित्रोस्वस
रितृष्वसरिपक्षिणीप्रपत्तेन्निशं तथामातुलेश्वशुरेमित्रेगुरौगुर्वंगनासुच त्र्याशौचंपक्षिणीरात्रिंमृतामातामह्यांयदितथापक्षिणीमस
पिंडयोनिसंबंधेसहाध्यापिनिचेत्तारिवचनानितिमूलं त्र्यथसज्योतिरेवेत्यस्यचप्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितइति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुवचनं मूलं ग्रामेष्वरेकुलपतौश्रोत्रियेवानपत्यिनि शिष्येपंचत्वमापन्नेशुद्धिर्नेक्षत्रदर्शनादितिबृहद्याज्ञवल्क्यवचनं ८ अथ
नवमेऽहनि शिष्येति एकदेशाध्यापकउपाध्यायश्चानूचानोंगप्रवक्तासगोत्रःचतुर्दशपुरुषानंतरंसप्तमपुरुषावसानःस्मृतस्मृष्टएते
षुशिष्यादिषुप्रमितेषुएकरात्रंत्र्यहोरात्रमाशौचमितिशेषःतथास्वगृहपरगृहेमातुलेचैकरात्रं तथाचसब्रह्मचारिणिचैकरात्रं
एकाचार्योपनीतःसब्रह्मचारी गुर्वंतेवास्यनूचानश्रोत्रियेषुमृतेषुचेतियाज्ञवल्क्यस्मरणात् बंधुत्रयग्रहणान्मातृबंधवःपितृबंध
वोमातृबंधवश्चोपलक्ष्यंते विज्ञानेश्वराचार्यैर्व्याख्यातत्वात् त्रिरात्रमाहरणेचमाचार्येसंस्थितेसति तस्यपुत्रेचपत्न्याचदिवारा

शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषुस्वगृहपरगृहेमातुलेचैकरात्रं

त्रमितिस्थितिरितिमनुस्मरणात् त्रहमेकोदशानांचगोत्रजानामहःस्मृतरतिजाबालिवचनात् त्रसपिंडेषुस्ववेश्मनिमृतेषुएक
रात्रमितिविष्णुस्मरणात् त्रत्रयेषापुनर्ग्रहणंतेषामसन्निधादिव्यवस्थादृष्ट्या श्रोत्रियस्यसमानग्रामीणास्येतिव्याख्येयम्
एकाहंसब्रह्मचारिणिसमानग्रामीणेचित्यास्वलायनवचनात् त्रथतत्कथमपिस्वल्पसंबंधपुंस्त्रानंवासोयुतंस्यादिति त्र
त्रत्रथशब्दोऽविकारार्थंतत्सूचनार्थंःकथमपिकेनापिप्रकारेणास्वल्पेनापिसंबंधेनसंबंधिनिभगिन्यादौसंस्थितेस्त्रानंवासोयु
क्तंसचैलंस्त्रानंशुद्धौस्यात् नान्यथेत्यर्थःतदुक्तंयाज्ञवल्क्यमुनिना भगिन्यांसंस्थितायांतुभ्रातर्यपिचसंस्कृते मित्रेज्ञातिमातरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रेतेदौहित्रेभगिनीसुतेशालकेतत्सुतेचैवसद्यःस्नानेनशुध्यतिइति इदमपुत्रंसकलमाशौचंसर्ववर्णेषुतुल्यंसाधारणमितिस्थितं ९ इदानीमाशौचमध्येत्वाशौचांतरसंनिपातेतन्निरूपयंदशमवृत्तेनाह वह्वाशौचस्यमृताशौचस्यमध्ये यदितुपुनरपरंत्वन्यदपिसमंदशाहाशौचमध्येदशाहाशौचंस्वल्पंवात्रिरात्रादिकमाशौचंवा सज्ञातिसमानजातीयंजाताशौचस्यमध्येजाताशौचंमृताशौचमध्येमृताशौचंवाभवतितदाश्वशेषेणाशुद्धिःसमंस्वल्पंवा ऊनेनस्वल्पाशौचमध्येपतितस्यदीर्घाशौचस्यनश्येषेणाशुद्धिरित्यावेदनीयं तदुक्तंसंशनेनस्वल्पाशौचस्यमध्येतुदीर्घाशौचंभवेद्यदिनश्येषेणशुद्धिः

रात्रिसब्रह्मचारिणंपथतुकथमपिस्वल्पसंबंधयुक्तेस्नानेवासोयंतस्यादिदमपिसकलंवर्णसर्वेषुतुल्यं ९
वह्वाशौचस्यमध्येत्वपरमपिसमंस्वल्पकंवाऽजातिप्रेतेजात्यंतरंवायदिभवतितदाश्वशेषेणाशुद्धिः ॥ ॥

स्यात्तत्कालेनैवशुद्धयतीतिप्रेतेजात्यंतरंबातथाप्रेतेप्रेताशौचमध्येयदिजात्यंतरंविजातीयंजननाशौचंभवतितदानुश्वेषेणमृताशौचेनैवशुद्धिःएतेनजाताशौचमध्येसंजातस्यप्रेताशौचस्यनश्वैरशुद्धिरित्यपिव्याख्यातंतेनसूतिःशावशेषिनीतिस्मरणात् द्वाभ्यांतद्रात्रिशेषेरात्रिमात्रावशेषेयद्याशौचांतरंप्रवेशंभवतितदाद्वाभ्यामपरदिनाभ्यांशुद्धिःत्रिभिरपरदिनैर्यामिनीयामशेषेयामित्यायामप्रहरःतन्मात्रावशेषेतुरीयप्रहरशेषेत्रिभिरपरदिनैरुन्नरदिवसैःशुद्धिःस्त्रीशौचादधिकंत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिर्दिनैः शुद्धिः नश्वो शौचशेषमात्रेणेति भावः रात्रिशेषेसति द्वाभ्यांप्रभातेतिरुभिःस्मृतेतिगौतमवचनात् पित्रोर्विशेषमाह नैवा शौचेनपित्र्यमिति अन्याशौचमध्येपतितंयत् पित्र्यंमातृपितृसंबंधिश्राद्धं शौचेनतद्भवेत् शौचशेषणानैवशुध्येत् पितुरुपशमे मातुर्वोपर तितस्यपित्राशौचस्यनसंकोचः मातुर्विशेषमाह पितुरुपशमनेपक्षिणीमातृमत्यावि ति पितुरुपशमने पित्राशौचमध्येमातृमृत्यौमातुर्मरणेजातेसतिपक्षिणी अधिका अशुद्धिर्हेतुर्नैतुयावद्दशाहमितिभावः तथाचस्मृतिः मातर्यग्रेप्रमीतायामशुद्धौसि

द्वाभ्यांतद्रात्रिशेषेत्रिभिरपरदिनैर्यामिनीयामशेषेनैवाशौचेनपित्र्यंपितुरुपशमनेपक्षिणीमातृमृत्यौ ९०
सर्वंत्वाशौचमंतर्यदिविदितमिदंशेषमात्रेणाशुद्धिर्दाहाहादाहितानौमरणदिवसतोन्यत्रकुर्यादशौचं ॥

यतेपिता पितुःशेषेणाशुद्धिःस्यात्मातुःकुर्यात्पक्षिणीमिति ९० अथैकादशश्लोकमाह सर्वमिति सर्वमिदमाशौचंयद्याशौचा तरमध्येएवविदितंज्ञातंभवतितदाशेषमात्रेणदशाहमध्येयान्यव शाष्टदिनानितावन्मात्रेणाशुद्धिर्नतुज्ञानदिनादारभ्येत्यर्थः एवंत्रिदिनाद्याशौचेपिद्रष्टव्यंप्रोषितेकात्रविशेषःस्यादितियाज्ञवल्क्यस्मरणात्श्राहिताग्नौरुदमाशौचं श्राहिताग्नौसाग्निकेमृते दाहाहात्तदाहदिवसतोदशदिनंकुर्यात् नपुनर्मरणदिवसतःअन्यत्र अनाहिताग्नौतुमरणदिवसतःकुर्यान्नतुदाहदिवसतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनग्निमत उक्तोऽग्नेः संस्कारकर्मणः शुद्धिः संचयनंदाहान्मृताहरुक्तायथाऽग्नौ शौचंचनात् आशौचांते यत्कृत्वाशुचिर्भवति तदाह स्त्रीरोस्नात्वेति आशौचेसचैलंसवस्त्रंयथा भवतितथास्नात्वा विहितहितदेवोक्तस्वाधिकारकेदेवपित्र्यकार्यंअहेकाः योग्यास्युरशौचयतिशेषः सूतिकायाविशेषमाह सूतिकात्विति सूतिकातुपुनस्त्रिंशद्रात्रेदेवकार्येचयोग्यानस्याच्छुद्धानभवतीत्य र्थः एतत्कन्याप्रसवेपुत्रप्रसवेतुविशेषमाह विंशतिपुत्रसूस्त्विति पुत्रजननीत्रिंशद्रात्रंउभयकार्ययोग्यतानभवतीत्येवान्वयः सूतिकापुत्रवतीत्रिंशद्रात्रेरशाकर्माणिकारयेन्मासेनस्त्राजननीमितिपैठीनसिस्मरणावशात् ११ अथद्वादशमंवृत्तमाह ।

स्त्रीरोस्नात्वासचैलंविहितहितकृतावर्हकाःसूतिकातुत्रिंशद्रात्रेनयोग्यापितत्सुरकरेविंशतिपुत्रसू रुक्ता ११ निर्हृत्यान्यंप्रमीतंदिवसमशुचिकोथासवर्णंतदुक्ताशौचोऽत्याग्नाथमाद्यःकृतुशतफलभागात्र वेनैवशुध्येत् ॥

निर्हृत्यान्यमितिनिर्हृत्येत्पत्रत्र्यंचसपिंडंसवर्णंनिर्हृत्यस्विसमाशुचिर्भवेत्तत्रैतद्होरात्रमतद्रहवा बासिनोऽतस्त्रजीवीनश्चत्रेयंतद्रहवासिनस्तदन्नेभरवारत्रिरात्रं तदन्नाग्निमरुदशरात्रमितिशेषं यथाचमनुः त्र्यसपिंडंहि जप्रेतं विप्रोनिर्हृत्यबंधुवत्तविशुद्धतित्रिरात्रेणमातृर्मातृश्चवांभवान् यद्यन्यमित्रंतेमातुर्दशाहेशौचवशुध्यति अतदन्नारत्र्यहेशौ चनचेत्तस्यशेषेनशेदितिअथासवर्णंस्नेहवशान्निर्हृत्यतदुक्ताशौचः पज्ञातीयस्यनिर्हरणंतस्मेउक्तमाशौंचेयस्मस्तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि ब्राह्मणश्चेच्छूद्रंनिर्हरेत्तत्तरामासमशुचिःतथाशूद्रश्चेद्ब्राह्मणंचरशाहमितिज्ञेयं एवमवरश्चेद्वर्णाःपूर्ववर्णमुपस्पृशत् स
वोवरंतत्कात्तच्छब्दोमाशौचमितिवचनात्त्रत्रनिहरणेपश्यशीशब्दाभ्यांप्रेतवहनंलक्ष्यते ततस्यापवादमाह त्रयाना
यमिति त्रनायंप्रेतंनिर्हृत्याधत्कातशातफलभागभवेत् त्राधत्रतुर्जातिष्टोमःत्रालंवेनैवसुद्यत स्नानमात्रेणोवशुद्धोभवेत् ए
एवकारेणास्नानान्नरमाशौचनिवृत्तिःप्रतिपादिता यथाहयाज्ञवल्क्यःत्रनाथंब्राह्मणंप्रेतंयेवहंतिद्विजातयः तेषांदेयत्त फल
मानुपूर्व्योवहेतिते नतेषामशुभेकिंचित्पापंवाशुभकर्मणांजलावगाहनात्तेषांसद्यःशौचंविधीयतइतिश्चथब्रह्मचारिणोवि

नीत्वोपाध्यायमातापित्रपरमगुरून्ब्रह्मचारीनदोषीतेभ्येन्यंनिर्हतोस्यव्रतमपिवितंतंभ्रश्यते
ऽवश्यमेव ९२ ॥ शेषमाह नित्वेतिउपाध्यायादीन्नीत्वानिर्हृत्याब्रह्मचारिनदोषभाक्भवति ब्रह्मचारीव्रतान्न
भ्रश्यतइतिश्चाचार्यंपितपाध्यायान्निर्हृत्यापित्रतीतियाज्ञवल्क्यवचनात्त्रन्यनिहरणेदोषमाहतेभ्योन्येइति।उपाध्यायादि
भ्योन्यंनिहतःत्रन्यनिर्हरणंकुर्वतोऽस्यब्रह्मचारिणावितंतंविस्तृतं चिरार्जितमितियावत् व्रतमप्यवश्यंभ्रश्यति ब्रह्मचर्या
च्युताभवतीति ब्रह्मचारिणःशवकर्मणोव्रतान्निवृत्तिरन्यत्रमातापित्रोरितिवशिष्टवचनात् एवंनिर्हरणाशौचमुत्काऽ
नुगमनाशौचमाह ९२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथत्रयोदशेनसूत्रेनाह तुल्येति तुल्योत्कृष्टानुयाने ब्राह्मणास्यब्राह्मणानुयानं एवंक्षत्रियादेरपिस्वस्ववर्णानुयानंतुल्यानुया
नं उत्कृष्टानुयानंतुक्षत्रियस्यब्राह्मणानुगमनंतथावैश्यस्यक्षत्रियब्राह्मणानुगमनंत
थाशूद्रस्यद्विजातीयानुगमनं तच्चतुल्योत्कृष्टानुयानंतस्मिन्शवेवसनसहितकःसवस्त्रःत्रिभस्मिनद्यादौस्नात्वास्नात्वाश्रथव
द्धिस्पृष्ट्वाग्निंसंस्पृशंतंप्राश्यविशुध्यतीतिमनुवचनंमूलंप्रसिद्धमेतद्वाक्यार्थकथनं तत्रच अनुगमनेछयाप्रेतंस्नातिमस्नातिमेव
वास्नात्वासचैलःस्पृष्ट्वाग्निंस्पृशंतंप्राश्यविधतीतिमनुःहीनानुगमनेशौचमाह अथदिनमितिब्राह्मणादेःक्षत्रियादयनुयाने

तुल्योत्कृष्टानुयानेवसनसहितकोंभस्मवात्स्नात्वाग्निंस्पृष्ट्वाजंप्राश्यशुध्येदथदिनमशुचिर्हीनव
र्णानुयाने पक्षिण्येकांतरानुव्रजनेऽहभवेद्यंतरत्वेत्रिरात्रंकृत्वास्नात्वासुनद्यामसुयमनशंतंसर्पिरा
शंचकुर्युः १२

अनुगंताब्राह्मणादिदिनमहोरात्रं अशुचिर्भवतीतिशेषःपक्षिण्येकांतरेपिएकांतरानुयाने ब्राह्मणा
स्यवैश्यानुयाने क्षत्रियस्यशूद्रानुयाने पक्षिणी अशुचितानिमित्तं भवेत् ह्यंतरेत्वेत्रिरात्रं ब्राह्मणास्यशूद्रानुयानेत्रिरात्रं अनु
गंताब्राह्मणोऽशुचिर्भवेदितिसंबंधः त्रिरात्रानंतरंकृत्यमाह त्रिरात्रंकृत्वासुनद्याउत्तमजलेस्नात्वा अमुयमनशंतंमंत्रणायामः
नजपंतंकुर्युःतदनंतरंसर्पिराश्यंप्रशंतंप्राशनंचकुर्युः॥एवंशुद्धाभवंतीत्यर्थः।तथाचपाराशरः प्रेतीभूतंतुयःशूद्रंब्राह्म णो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानदुर्बलश्चयुगछेत्रीयमानंसत्रिरात्रेणशुध्यति त्रिरात्रानुततश्चीरोनंदीगत्वासमुद्रगो मासेनामशतंकृत्वाकृतंप्राश्यविशुध्य
तीति ९३ अथाधिकारिविशेषेणाधिकारंविशेषंचतुर्दशभिर्दर्शयति तातेति तातःपिताचैवामाताचाचार्यःउपनीयवेदाध्याप
कःएभ्यःएभ्यःअनलजलतिलानदद्यातीत्यनलजलतिलदःस्वंविधोब्रह्मचारीतदीयाशौचःतदीयाशौचमानंभवति तदीयाशौचमुद्धा
मुद्धोभवति अन्येभ्यस्तुतद्दःअनलजलतिलदःतदीयाशौचःसन्नाशौचांतेपुनरुपनयनमधिकंकारयेत् ततःशुद्धोभवतीत्यर्थःअभि
संधिःएतच्चाचार्यपितृपाध्यायान्निहत्यापित्रतीव्रतीसकृदाचरनाश्रीयान्नचतेःसहसंविशेत् इत्येतद्यास्मानेमिताक्षरायांस्पष्टी

तातंबाचार्यकेभ्योऽनलजलतिलदोब्रह्मचारीतदीयाशौचोऽन्येभ्यस्तुतद्दःपुनरुपनयनंचाधिकंकार
येतु अन्येत्वज्ञातिकेभ्योयदिददातितदातत्प्रयुक्ताशुभासःकुर्युःकृच्छ्रत्रयंचाब्धमदहनविधौतंतमेवा

हुवंति ९४

हुतं अन्येतु अन्येब्रह्मचारीव्यतिरिक्ताःअज्ञातिकेभ्योयद्यनलजलतिलान्स्नातितदातत्प्रयुक्ताशुभातदाशौ
चभाजःस्युःतदीयाशौचेनैवाशौचवंतस्युरितितात्पर्यं अधिकंकृच्छ्रत्रयंचापिकुर्युःततःशुद्धाभवंतीत्यर्थःअथमदहनविधौयदा
अथमदाहकातदातंतमेवभावंप्राप्नुवंतितेनतेनाग्नेमेनतुल्याभवंतीत्यर्थःएतच्चनोक्तमस्माभिर्ग्रंथगौरवभयेनेतिनिरीक्षितं ९४ अथ
देशांतरमृतस्यशरीरलाभेचदाहविधिंपंचदशभिर्नाह पालाशीति आहिताग्नेःसाग्निकस्यास्थिभिःप्रतिकृतिं तल्लाभेशीनका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिश्रोत्रविधिनापालाशीपलाशनिर्मितांप्रतिकृतिंकृत्वातांचदग्ध्वा स्नातपोदशाहाद्याशौचंकुर्युः तत्रतत्रनृणांत्रनाहितानीनांपा
त्राश्यादिप्रतिकृतिंदग्धास्नातयःत्रीण्यहानित्रिरिनानित्राशौचंकुर्युः अग्नीभपत्रमूलवशिक्वचने त्राहिताग्निश्चेत्प्रवसन् म्रियतेत
त्पुनःसंस्कारंकृत्वाशववदाशौचंत्रनाहिताग्नेःत्रिरात्रमिति सुपिष्टैःजलसंमिश्रैर्दग्ध्वाश्वकर्णादिना त्रसौस्वर्गोपलोकायस्वाहेत्य
त्कासबाधवैःएवंपरीशरीरंदग्ध्वात्रिरात्रमशुचिर्भवेदितिच त्रन्योविप्रादिःत्रन्योत्रसकुल्योदशाहाच्छौचंवर्तीतहेत्यदनं त्रनंसक

पालाशीमाहिताग्नेःप्रतिकृतिमथवाप्रस्थीनिदग्ध्वादशाहाद्याशौचास्नातयःस्युस्तत्रतत्रनृणांत्रीण्यहा
न्येवकुर्युः त्रन्योविप्राद्यशौचेसकृदन्नमदंस्त्रावदाशौचकृत्स्याद्यावन्नेमांतदंतेव्रतमपिचरेद्रोदने
त्वेकरात्रं ९५ जन्मन्यस्पृश्यतानोभवतिकुलभवांमातृवर्जंपितुरुक्तस्नानाद्दूंदुसचैलादथनिमनकृता
शौचकल्पेत्रिभागे ॥ देकवारमपित्रदन् भुंजन् तावदाशौचकृत्तेषांयावत्कालमाशौचंतावदाशौचकृत् त्रशुचिःस्या
न् त्रंते त्राशौचेतत्व्रतमपिचरेत् त्राशौचांतेयस्ययद्व्रतंविहितंतदपिचरेत्कुर्यात् उभयत्रदशाहानिकुलस्यान्नंनभुंजतेतिनि
षिद्धाचरणादितिभावःरोदनेत्वेकरात्रंप्रेतमपिदैःसहरोदनेकृतेएकरात्रंमाशौचकृत्स्यात् तथाचपारस्करःमृतस्यवाभवैःसार्द्धंस
त्वातुपरिदेवनं वर्जयेतदहोरात्रंदानेश्राद्धादिकर्मचेति ९५ त्रत्राशौचशब्देन त्रशुचित्ववोचिनात्रस्पृश्यत्वस्यप्रतितौरुक्तत्वाजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तान्यजन्माशौचेतदपवादंशोऽशवृत्तेनाह जन्मेति जन्मनिजन्मनिमितास्पृश्यताकुलभुवांसपिंडानांशोदकानांचनोभवति किंतुमात
वर्जेमातुःसूतिकायास्तूत्रस्पृश्यताभवत्येवेत्यर्थः पितुर्विशेषमाह स्नानाद्दूर्ध्वंचेलादि संचेत्स्नानात् ऊर्ध्वं पितुरप्यस्पृश्यतानोभवती
तिपूर्वेणसंबंधःतथाचसंवर्तः जातेपुत्रेपितुःस्नानंसचैलंतुविधीयते माताप्युद्वोदशाहेनस्नानात्स्पर्शनंपितुरिति चंगिरास्तु सूतके
सूतिकावर्जंसंस्पृशेननिषिध्यतइति मृताशौचेप्यस्पृश्यत्वसंकोचनमाह अथेति निधनकृताशौचेमरणनिमित्ताशौचे अल्पे
त्रिरात्रादिके त्रिभागेत्रिधाविभक्ते दूर्वोशस्योपरिप्रथमांशादुपरितनेयद्भागद्वयंतत्रास्पृश्यतानोभवतीतिसंबंधः इत्थंमहतिचेत्।

दूर्वोशस्योपरीत्थंमहति चयदिसंचायनंकृतमासीन्नोचेत्तस्योपरिष्टादथतुगृहजयोर्दासयोराप्लवोर्द्वे ९६
अन्नेनोपांतयोरुक्त्वाविरजनिचरणादत्तदासादिकानांस्वाम्याशौचाहसंख्यासमदिनगमनादूर्ध्वमन्यत्तुसूत्रं

महतिचदशाहादिकेपिरश्मेवमेवपूर्दिसंचापनं अस्थिसंचयनानंतरंत्रिनात्रिधाविभज्यप्रथमभागंत्यक्त्वाउत्तरभागद्वयेस्पृस्प
श्यतानोभवति दूर्वेभागेतुभवत्येवेतितात्पर्यं स्वाशौचकालाद्धित्रेयंस्पर्शनंतुत्रिभागतः शूद्रविट्क्षत्रियविप्राणांयथाशास्त्रंप्रणोदि
तमितिस्मरणात्तत्स्था दशाहादित्रिभागेणकृतेसंचयनेक्रमात् अंगस्पर्शनमिछंतिवर्णानांतत्वदर्शिनःत्रिचतुःपंचदशभिःस्पृस्पा
वर्णाःक्रमेणात्रितिदेवलस्मरणात् अथतुअथेत्यधिकारांतरे गृहजयोःस्वगृहएवोत्पन्नयोर्दासीदासयोराप्लवोर्द्वेस्नानानंतरंस्पृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दासभेदेनयस्यश्यत्वकालभेदंसप्तदशवृत्तपूर्वोर्द्धेनाह अन्नेनेति अन्नेनोपात्तयो अनदानेनगृहीतयोर्योसीदासयोरुक्तपुनःनिजननीचरणात्रानिनयगमनात् उर्द्धमस्यश्यतानोभवतीतिपूर्वश्लोकगतेनान्वयःनुशब्देनपूर्वस्माद्विशेषमुक्तः दत्तदासादिकानांस्वाम्याशौचाहसंख्यासमदिनगमनात् उर्द्धंचस्यतानोभवतीतिएवान्वयःआदिशब्देनद्रव्यादिकृतानांसंग्रहःस्वामिनोयावत्याशौचंकिनानितेषांसंख्यासमदिनानां अतिक्रमणाद्दूर्द्धमित्यर्थः अन्यत्तुसूत्रंदासस्यस्वसाध्यकर्मरूपेवयोग्यतानतुकर्मोपिकोरनयास्मृतिकायाःदास्याःस्वप्रसवनिमित्तमस्यशत्वमासमित्येतत्सूत्रंस्मरंदासाद्याशौचेसद्यःशुध्येत्गर्भदासीभर्तृदासस्वहाछुद्धि

जातेपत्येतत्सिन्नहनिनिशिचतन्मंगलार्थेषुयोग्याःसर्वोशौचेसदानोभवतियतिवनिब्रह्मचर्यस्थितानां

१७

स्थितिस्मृतिःतथादासीदासस्यसर्वोवैश्यसवर्णसमोभवेत तद्वर्णस्यभवेच्छौचंदास्यामासंतुसूतकमितिअंगिराश्चचनंमूलं इदानीं जाताशौचेजननिमित्तंयत्कार्यंतत्रशुद्धिमुत्तरार्द्धेनाह जातेपत्यौचपत्येजातेतन्मंगलार्थेषुतत्स्यापत्यस्यमंगलार्थकर्मसुतस्मिन्नहनितत्सामेवनिशिचयोग्यास्त्यन्वयःअयमर्थःअयत्यमंगलार्थानिकर्माणियस्मिन्दिने यस्यांचनिशिविहितानितेषुप्रथमदिनादिसाध्येषुकर्मसुसवेंसूतकिनस्तस्मिन्काले योग्याअधिकारिणोभवंतीति तथाचव्यासवाक्यंसूतिकावासनिलयाजन्मदानामदेवताःतासांयोगनिमित्तार्थेशुद्धिर्जन्मनिकीर्तिता प्रथमेदिवसेषष्ठदशमेचैवसर्वदा निष्पेतेषुनकुर्वीतसूतकंपुत्रजन्मनीति उक्ताशौच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सस्सर्वेऽपरुषविशेषे चापवादमाह सर्वाशौचमिति एतत्सर्वमाशौचं सस्सासर्वकालंयति संन्यासीवनीवानप्रस्थब्रह्मचर्यस्थितउभ
यविधोब्रह्मचारी एतेषांनोभवति यौनकर्थेविरप्याशौचभाजोभवेतीत्यर्थः ९७ अथयेषुयेषुकार्येषुयेषां सूतिकानांतात्कालिकी
मुद्दिश्येषांतामधादशरात्रेननाहतत्कालेपितिपक्षेपानिमानिकार्याणि आजीविकार्थेविहितानि तेषांतेषुतेषु कर्तव्येषु अनन्य
सिद्धेषुसर्वाशौचंसदानोभवतीतिपूर्वश्लोकगतेनान्वयः अत्रसत्रिणांअत्रसत्रप्रावृताःव्रतिनःप्रारब्धप्रायश्चित्तसत्रिणव्रताःनृ
पोराज्ञेभिषिक्तःरूपवान्राजसेवकःदीक्षितोयागकर्ताऋत्विजअध्वर्यवादिकर्मकर्तारःअनेकश्रुतिपदनोबहुवेदशास्त्राध्यय

ननत्कार्येषुसत्रिव्रतिनृपनृपवरीक्षितर्त्विक्सुरेशभृशंशापत्स्पृनेकश्रुतिपदनभिषक्कारुशिल्पानुरा
गां संप्रारब्धेषुदानोपनयनजयनश्राद्धोद्वप्रतिष्ठा चूडातीर्थार्थयात्राजपपरिणयनाद्यत्सवेष्वेतद्

नशीलन्यातुरोरोगी अन्येतुप्रसिद्धाःएतेषांसर्वाशौचंनैवभवतीत्यर्थः संप्रारब्धेषुसमादयउत्सवाःप्रसिद्धाःएतेषुसं ९८
प्रारब्धेषुनिष्पाद्यमानेषुसतरर्थैएतत्सिद्धिमित्तेकार्ये एतैःसत्राद्यभिःसंसाध्यमानकार्यैःइतियावत्। एतेषांसर्वाशौचंनोभव
तीत्यनेनैवसंबंधनतथाचयाज्ञवल्क्यवचनं ऋत्विग्दीक्षितानांचयज्ञियंकर्मकुर्वतांसत्रेव्रतिब्रह्मचारिस्नातब्रह्मविदांतथादाने रम॰
विवाहेयज्ञेचसंग्रामेदेशविप्लवेआपद्यपिचकष्टायांसद्यःशौचंविधीयतइतिकाशकृत्स्नःदोडुभिक्षाद्याःतथाग्नेचोक्तवचनमविरुद्धं ९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खः शिल्पिनो वैद्याः दासीदासाश्च ये चैव राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः इति ९८ अथेदानीं मृत्युविशेषात् अन्याशौचापवा
दमेकोनविंशतिमेनवृत्तेनाह नाशौचमिति पतितासुपत्यादिद्यादिनीषु च स्त्रीषु मृतासु प्रसूतासु वा ज्ञातयः सपिंडाः नाशौचं नाशौच
मस्नुद्यानस्य तथा दोषाद्दोषेणाहेतुनाये पाषंडवेदाउक्ता धर्माभासमाश्रयंते ते पाखिंडिनः अविहितलिंगधारिणः इति पावत् चौराश्च न
उक्तानद्रव्यहराः आश्रमरहिताः सत्यधिकारेण्यकृताश्रमविशेषपरिग्रहाः सुरेपयाः निषिद्धसुरापानरताः हीनोपगाः अधर्मेन
सहसंगताः आसुमृतासु च ज्ञातयो नाशौचास्युरितिसंबंधः अत्रलिंगञ्चविवक्षितं तथा संदर्योगर्वोपस्मद्देषरागद्विद्भूर्वसर्पादी

नाशौचाज्ञातयः स्युः पतितपतिसुतब्रह्मविद्घातिनीषु दोषात्पाखंडिचोराश्रमरहितसुरापेयहीनोपगासु
संदर्पात्सर्पविभक्षितिपपशुदिवाकीर्तिकाद्यैर्हतेषु स्वेच्छाश्वैचशस्त्रज्वलनजलविषानाशकाद्यैर्मृते

नृदिवाकीर्तिश्चांडालस्तदंतानपकृतुमाभिमुख्येनये प्रवृत्तास्तैर्हतास्तेषु मृतेषु नाशौचाज्ञातयः स्युः एभिः दैवाद्धते सु ९९
षुनेदमित्यर्थः तथा स्वेच्छाश्वैशत्वलोहं ज्वलनोग्निः जलं वारि विषवत्सनागादि अनाशकमविहितोन्नत्यागः आदिशब्दाद्
विहितभृग्वपातादिभिः प्रकारैर्मृतेष्वपि ज्ञातयो नाशौचास्युरित्यन्वयः पाखंड्यानाश्रिताः तेनाभर्तृगाः कामगादिकाः सुरापा
आत्मत्यागी चन्योनाशौचादकभाजनाः इति योगीश्वरस्मरणात् ९९ इदानीमाशौचिकानां षड्पादेयमद्विंशतितमेनवृत्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाह नाशौचमिति यातिःगतिःमरणमितियावत् जातंजन्मतन्निमित्तमाशौचंया तिजाताशौचंतस्मिन् कृत्रिमेवानिमित्तंतरक्त
तेवाशौचेरक्तशाकादिषुत्रामभोज्यंतेषुत्राशौचं त्राशौचिसंबंधिदोषोनस्यात् एतानिसर्वेशौचेषुत्रपिनाशुद्धात्यभिप्रायः॥
अत्रचषऽपिसन्नम्यंतपदानिनाशौचमित्यनेनप्रत्येकंयोज्यानि दद्यादद्यादिमानिस्वयमित्यनुमननात् तत्स्वाम्यनुज्ञयाश्रा
निशाकादीनियस्यमाशौचरहितःपुमान् अन्येभ्योपदद्यात् स्वयंचाद्याश्च एवंकृतेदोषोनभवति इतित्रयिप्रायःतथाचयाज्ञ

नाशौचंशाककाष्ठाप्जिनलवणतक्षीरनीरामिषेषु पुष्पेमूलेफलेचौषधिदधिमधुघृतस्यात्तिलेक्ष्वा
मभोज्ये दद्यादद्यादिमानिस्वयमनुमननात्स्वामिनोयातिजाता शौचेवाकृत्रिमेवापणितमपणितंचा
पिसर्वेशुचिःस्यात् २० जातारण्यग्निनावीकूपरिणायनविधेर्ग्धिरोधानकालाकृत्येरोगाद्धुनविधा
हितहुतवहनेलौकिकेनाग्न्यभावे॥ तमपणितंचसर्वेपुरुषंप्रशुचिस्यादितिस्थं यथाहमरीचिःलवणेमधुमांसेच
पुष्पमूलफलेषुचशाककाष्ठत्रीव्रीषुदधिसर्पिपयःसुचतिलौषधाजिनेचैवपक्वापक्वंस्वयंग्राह्यंपरान्नेषुचैवसर्वंप्रनाशौ
चंमृतसूतकरहितं अत्रपक्वंभक्ष्यजातं अपक्वंतंडुलादिरत्नतत्पक्वापक्वाभ्यानुज्ञानमल्पछत्रप्रदत्तविशेषज्ञेयं अन्नसत्रप्रदत्ता
नामामन्नमसगोत्रंतं भुक्त्वापक्वान्नमितेषांत्रिरात्रंतुपयःपिबेत् इतित्रयिरात्रवचनं २० इदानीमग्नेरुपादेयानुपादेयत्वमेक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विंशतितमेनसूत्रेनाह जातारण्याग्निनेति अर्वाक्परिणायमविधेः विवाहात्प्राक्जातारण्याग्निनादग्धिः दाहः जातारणिजात
कसमयेयारणिंसन्मथ्यनोत्पन्नेनेतियावत् विवाहादूर्द्धंआधानकालादाधानादर्वाक्गृह्येणवैवाह्येनाग्निनादग्धिः ततऊर्द्धंतु
आधानकालानंतरंविधाहितहुतवहनैः विधिनाआहितोः विधुक्ताधानाख्यसंस्कारैः संस्कृतायेदक्षिणाग्न्यादयस्त्रयः तैरखद
ग्धिः लौकिकेनस्तेषांजातारण्याग्न्यादीनां अभावेलौकिकेनअसंस्कृतेनअग्निनादग्धिरित्यन्वयः तदुक्तंस्मृत्यांतरेवल्केयन
आहिताग्नियथान्यायंदग्ध्वाग्निभिरनाहिताग्नेरेकेनालौकिकेनापरेणजनेनेति क्वचिल्लौकिकाग्न्यपवादमाह

चांडालाग्निचिताग्निपतितहुतभुजसूतिकाग्मेध्यवह्निजखालूद्राहतेनेंधनदहनघृताद्येनदाहोप्यदा
हः २९ सर्वेनूष्मीविदध्यादुपनयनविधेःप्राक्परंतुस्वशाखाश्रोत्रैरुदिधाने: सकलशवविधिंपे
क्षतेवरोवा ॥ चांडालाग्निमिति प्रेतदग्धौचंडालाग्न्यादीनसृत्वान्नोपवादद्यात् तदुक्तंदेवलेन मूद्राहतेनेत्यादिनं
धनंकाष्ठंघृतमाज्यंआदिशब्देनपयःप्रभृतीयदुपयुज्यतेतत्संग्रहः मूद्राहतेनेंधनादिनायोदाहःसोप्यदाहइतियोजना का
नोप्यकृतएवेत्यर्थः तथाचाहयमः यस्यानयतिमूद्रोग्निंतस्याकाष्ठहवीषिच प्रेतत्वंहिसदातस्यसचाधर्मेणालिप्यतइतिमनुवच
नात् २९ अथवाविशेषसूत्रेनदहनेइतिकर्तव्यताअधिकारिणआह सर्वमितिसर्वेणतत्सर्वंस्याद्दाहादिकंसउपनयनविधेःप्राक्तन्

क्षीमसंत्रकमेवविदध्यात् तथाचोक्तं लौगाक्षिणा तूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेववेति परंतूपनयनानंतरंस्वशाखोक्त
सूत्रद्विधानेनैविदध्यादितिस्थितं अत्रचउपेतश्चेदाहिताग्न्याद्यन्तार्थवदितियाज्ञवल्क्यवचनमनुसंधेयं इदानीमधिकारिणोनि
रूपयति सकलेति सकलं सशवविधिंप्रथमदिनमारभ्यदशाहांतंस्वशाखोक्तंकर्मज्येष्ठःपुत्राऽनुपपत्त्याऽन्यतरोवाविदध्यादि
तिसंबंधःपुत्राभावेकर्त्रविशेषंदर्शयति क्रमेणेतिक्रमेणासपिंडाभावेपरपरसपिंडक्रमेणाःस्वकुलजःसपिंडःसोदकोवा तदभावे
जननीवंशःतदभावेशिष्यःतदभावेऋत्विक्तदभावे आचार्योवाविदध्यादित्यन्वयःसकलोत्पनेनदशाहांतकर्मैवेहकार्यं इ

पुत्राभावेक्रमेणास्वकुलजजननीवंश्यशिष्यर्त्विजोवाचार्योवायत्रकुर्यात्प्रथमदिनविधिंसोपितत्रैवदशा
कांतं २२ स्नानान्नःखानमात्रेनजलहुतवहोनामवर्षत्रयांतःकामंचोद्धृतनिर्णेभवतउपरतेऽन्यत्रोलकेचौ

तिसूचितं तथाचशंखपरिशिष्टे असगोत्रःसगोत्रोवापदस्त्रीयदिवाऽमान्प्रथमेहनियोज्याऽदशाहंस लयेत् ॥
मापयेदितिगौतमस्मृतिः पुत्राभावेसपिंडाःशिष्याश्चेदनुतदभावेऋत्विगाचार्योवपि इदानींदेशनियममाह यत्रेति यत्रयस्मि
न्देशेप्रथमदिनविधिंकुर्यात्सोपिसएवदेशःतत्रैवदशाहपर्यंतंतत्कर्मोहरतिशेषःयत्रप्रथमदिनकृत्यंतत्रैवदशा
हदिनपर्यंतंसमापनीयमितिअभिसंधिःअत्रदेशनियमेशिष्याचार्योमूलमनुसंधेयं २२ अथयत्रयोविंशतिमवृत्तमाहस्नानाम्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति अनाम्नःनामकरणात्प्राक्उपरतेमृतेस्नानमात्रंखननमेवमात्रशब्दार्थस्स्पष्टयति नजलहुतवहाविति स्पष्टं नाम वर्षत्रयो
नः नामनामकरणं ततःप्रारभ्यवर्षत्रयांतःवर्षत्रयमध्येउपरतेजलहुतवहौ कामस्वेछयानुष्ठेयौननियतौ ऊर्द्धंवर्षत्रयानंत
रंतु अकृतचूडेऽकृतउपरतेनित्यौनियतौभवतःकृतचूडेतुविशेषमाह चौलपूर्वंनियतौ कालविशेषादिति कालाविशेषात्वर्ष
त्रयात्प्रागपिकृतचौलेनित्यावित्यर्थः।खननेविधिमाह अथेति पितृमुखराःपितृमुख्याःखननयोग्यंप्रेतंस्नापयित्वा अथा
नंतरंश्रेवरस्नगंधाद्यैःशोभयित्वाआज्यैर्विलिप्यनिखनेयुरितिशेषःअत्रमूलंऊनद्विवर्षेप्रेतंनिखनेन्नकुर्याद्वृद्धंकृतचूडंति

नित्यौकालाविशेषादथपितृमुखस्स्नापयित्वांवरस्रक्गंधाद्यैःशोभयित्वामृतमथखननेयोग्य
माज्यैर्विलिप्य २३ प्रत्यग्द्वारानगर्याबहिस्खनिसुरक्षत्रियेनूत्तरेणाग्द्वारेणौवबैश्यंपितृदिशिबृष
लेनायपित्वानुयायुः ॥ यास्तवल्क्यवचनं तथाऊनद्विवार्षिकंप्रेतंनिदध्युर्बोधवाबहिः अलंकृतमसुचौभूमानस्थि
संचयनादृते।नास्यकार्योग्निसंस्कारोनापिकार्योदकक्रिया अरण्येकाष्ठवत्पत्काक्षिपेपुत्रहमेवमुरितिमनुवचनं तथाऊन
द्विवार्षिकंप्रेतंघृताक्तंनिखनेद्बहिः यमगाथागायमानोयमस्तुमनुस्मरन्निति यमस्मरणं चापिमूलमित्यनुसंधेयं २३ इदा
नीशवनयनेवरणविशेषेणद्वारविशेषमाह प्राग्द्वारेति अथनिसुरंब्राह्मणं मृतंनगर्याः प्रत्यक्द्वारापश्चिमद्वारेणबहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नोपपित्वासर्वेज्ञातयोबंधीयःश्रेवंसूद्वशरःसरंयथाभवत्येवमनुयायुःश्रनुगछेतुः श्रयमनुगमननियमोहिवर्षाधिकृवपोमृतौ
कीयःगतयाहपाशवल्क्यः श्राश्मशानादनुव्रज्यस्नातरोज्ञातिभिर्मृतस्नति स्नात्वियंतु उत्तरणाद्वारेण वैश्यंतुप्राग्द्वारेण वृषलंपश्चद्वं
पितरिशिरक्षिणास्यांदिशियद्वारंतेनानायित्वासर्वेज्ञातयोबंधीयःश्रेवमनुयायुरित्यन्वयःतथाचस्मृतिःदक्षिणेनमृतं शूद्रं
पुरद्वारेणनिर्हरेत् पश्चिमेनतरश्रेवैस्तु यथासंख्यंहिजातयइति इदानीवयोविशेषमृतस्यानुगमननियमापवादमाह उनद्विश
रडपरतावितिं ऊनद्विवार्षिकमृतौसत्यामनुयानेऽनुगमनेनियमोनास्ति तदपरतावनुगमनवत्तेव्यतानावश्यकीभवतीति

बंधीयःश्रेवमूनद्विशरडुपरतौनानुयानेनियमः शूद्रैस्स्रष्टोथवोढोयदिभवतिमृतःप्रेतभावान्नमुक्तिः २४
ज्ञातीनांमातृपित्रोरपिपरमगुरोर्नित्यमंभोथमित्रप्रतास्वस्त्रीपपाज्यश्वशुरगुरुसुहृद्याजकानांपथेछं

यावत् श्रत्रापिश्रेवोक्तापाशवल्क्यस्मृतिमूलं श्रथशूद्रकृतस्य शीवहनयोर्दोषमाह शूद्रैःस्रष्टोथवोढोयदिश्रुतिः
यदिमृतःप्रेतःशूद्रैःस्रष्टोथवाऊढोभवतितदातस्यप्रेतभावान्नमुक्तिःएतत्तुसत्सुब्राह्मणादिषुश्रुति तथाचमनुःनविप्रेस्वेष
तिश्रत्सुमृतंशूद्रेणाहारयेत् श्रस्वग्र्यास्याहुतिःसास्यात्सूद्रसंस्प शीहसाधितेति २४ इदानीउदकदानेविशेषंपंचविंशेनश्लोकेना
ह ज्ञातयःमिति ज्ञातयःसपिंडाःसोदकाश्च मातृपितरौप्रसिद्धौ परमगुरुचार्योमाता महश्चएतेषामंभःउदकदानंनित्यं श्रय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्थं सपिंडानां सपिंडोद्देशेन सोदकानां सोदकोद्देशेन उक्तस्य मातृपित्र्यदेशेन ब्रह्मचारिणः आचार्योद्देशेन दौहित्र मातामहोद्देशेन
चयदुदकदानंतन्नित्यमिति। यथाहयाज्ञवल्क्यः। सप्तमादृशमाद्वा पितृतो योऽभ्युपयंत्यपरुति॥ तथाएवमातामहाचार्य प्रेतानां उद
कक्रियेति। इतरत्र नियमाभावमाहः अथमित्रेति। मित्रंसखा। प्रेतापरिणिता। दुहितासुसावास्वस्त्रीयादयः प्रसिद्धाः। एषांते भोदानंय
थेछंरत्नयाभवतिननियतंतथाहयाज्ञवल्क्यः॥ कामोदकंसखिप्रेतास्वस्त्रीयस्वसुरर्त्विजामिति॥ केषांचित्उदकंदाने कर्तृत्वाप
वादमाह। नब्रह्मचारीवनपतिपतितक्लीवपाखंडिचौरादद्युर्येतत्रपिंडाऽनलजलकथनानर्हकास्तेनसूक्ताः २५
संस्कृत्यानीक्षमाणाः सकलकुलभवोबालश्चैवब्रजित्वानादेयेबृद्धश्चैवंपयसिस्नवसनाएकवारंनिमज्य।

माह। येत्विति। तेतुपुनः सूक्ताः। पूर्वोक्ताएव। तथाचस्मृतिः। नब्रह्मचारिणः कुर्युरुदकंपतितानचेति। वृद्धमातुरपिक्लीवाद्यानोदकं
दद्युस्तेनात्मविधर्मिणः। गर्भेभर्तृदुहश्चैवसुरापस्त्रीपियोषितइति २५ अथषड्भिश्लोकैर्बृत्तेनसंस्कारानंतरंयत्कार्यंतदाहासं
स्कृत्येति तेसकलकुलभवःसर्वेज्ञातयोबालश्चैवबालप्रमुखाः प्रेतंसंस्कृत्यदाहयित्वासंस्कारस्थलीमनीक्षमाणानादेयेपय
सित्रजित्वाबृद्धश्चैवबृद्धपरःसरंयथाभवतिएवंसवसनाः सवस्त्राएकवारंनिमज्यपाषाणैत्रिःत्रिवारंसकृदेकवारंवाप्रतिदिनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यहंदशदिनावधिउदकंदशीरनृतिसंबंधः।उदकदानेवर्णभेदेनविकल्पनियमंविशदयितुंतान्विशिनष्टिब्राह्मणाक्षत्रियादिनाब्राह्मणोमृतवतिदक्षिणा स्याःदक्षिणाभिमुखाः।क्षत्रेक्षत्रियेमृतवतितुउदङ्मुखाः विशिवैश्येतुमृतवतिप्राङ्मुखाइति।अत्रमूलंयथाविभागंशरीरमग्नौसंयोजनवेक्षमाणाश्चयोऽभ्युपपद्यतीति शातातपस्मृतिः।प्रेतस्यबोधनायथाऽहूमुदकंभवतीर्यनोऽहूवैपुरुदकंतेप्रसिंचेपुत्रयस्यप्रेतोपवीतवाससोदक्षिणाभिमुखाब्राह्मणास्योदङ्मुखाप्राङ्मुखाश्चक्षत्रियवैश्ययोरितिप्रचेतोवचनात्तथासकृत्प्रसिंचेत्पुदकंनामगोत्रेणबान्धवताइतियाज्ञवल्क्यस्मृतिः।तिस्रएकंकुर्युःप्रेतस्तृप्यन्वितिप्रचेतोवचनमपिमूलमनुसंधेयं २६

पाषाणेत्रिःसकृद्वाप्रतिदिनमुदकंब्राह्मणोदक्षिणास्याःक्षत्रेनूदङ्मुखावैमृतवतिविशिनुप्राङ्मुखास्तदशीर
न् २६ स्नापभूयोपितत्रत्रिनिशिमनस्नानात्तपोहनिशंबाक्रीतोत्पन्नाशनावाऽमिषलवणापयःक्षीरमन्यत्पजेपुः

इदानींउदकदानानंतरंयत्कार्यंतत्सप्तविंशेनश्लोकेनाह स्नापइति ज्ञातयस्तत्रपयसिभूयोपिउदकदानानंतरंपुनरपिस्नापुःस्नानंकुर्युः।ततश्चैतत्कर्मत्रिरेवैतदाह त्रिनिशमितित्रित्रिशंत्रिदिनेअनशनाःअभोजनाःसंतः।अहर्निशमेकमहोरात्रेअनशनाःक्रीतोत्पन्नाशनावासंतःक्रीतंक्रयेणप्राप्तंउत्पन्नमयाचितंप्राप्तंतदशनाःभ्वामिषलवणापयःक्षीरमन्यत्पजेपुरितत्स्पष्टं।तथास्त्रीसंगंमैथुनादीनिव्यसनहसनंचत्पजेपुरितिसंबंधः।तथाउद्वोदनोचासनान्यपित्यजेपुरितिश्वेनसंबंधः।। अहर्निशाकृत्यमाहत्रातृणोस्ती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णांक्षितीतिताराणांतरणानिर्मितमास्तरणांतेनास्तीरणांश्राच्छादितापा।क्षितिभूमितत्रातिनियताःब्रह्मचर्यादिनियमयुक्ताःपृथक्पृथक्निशा
यांसंविशेयुःस्वापयुःस्पष्टमन्यत्। अत्रचक्रीतलब्धाशनाभूमौस्वपेयुस्ते पृथक्पृथक् इतिपाशवेल्कपवचनात्।तथाग्रहात्ब्रह्मजिताः
धःप्रस्तरेत्वहमनश्नंतत्रासीरन्क्रीतोत्पन्नेनवावर्तैरन्तितिवसिष्ठवचनाच्चतथा भस्मारालवणान्यास्थिमज्जेयुश्चतेत्रहामांसाश
नंचनाश्नीयुःशयीरंस्तेपृथक्क्षितावितिमनुवचनात्।तथा अधःशय्यासनिनोब्रह्मचारिणःश्वसर्वेइतिगौतमवचनंचमूलमनुसंधेयं
२७ इदानींदशाहसंबंधिविधिमष्टाविंशेनसूत्रेणाह संस्कर्तैति संस्कर्ता दाहकःदहनार्हःदहनानंतरंप्रत्यहंप्रतिदिनंदशाहावध

स्त्रीसंगंमंगलान्यभ्यसनहसनमुदीदनोद्वासनानिरुद्धारणंस्त्रीसंक्षितौतेपृथगतिनियताःसंविशेयुर्निशा
यां २७ संस्कर्त्तोदभेपिंडेसमधुदहनतप्रत्यहंपिंडमेकं भूमावेवावपेत्तप्रथमदिनचरुद्रव्यमेवोपरिष्टात् ॥

धिदभेपिंडेभूमावेवास्तेदर्भसमुदायेएकैकंपिंडंसमधुयथाभवतितथावावपेत्स्यात्तथाचस्मृतिः।नवभिर्दिवसैर्देयात्तत्र
पिंडान्समाहितःदशमंपिंडमुत्सृज्यसप्तशेषेशुचिर्भवेदिति अत्रभूमावित्पनेनपाषाणादिव्यावृत्तिःसूचिताततोऽन्यंशेषेण। भूमौ
मास्यपिंडंपानीयमनुलेपनंचदद्युरितिपिंडदानेद्रव्यनियममाह प्रथमेतिप्रथमेदिनेयत्चरुद्रव्यंतद्देवोपरिष्टात्पावनदशाहं
कर्तव्यंनतद्द्रव्यांतरमुपादेयमितियावत् नदुंबरेमुनेःपुत्रमुनिनाशालिताससक्तुभिर्वापिशाकैर्वाप्यथनिर्वपेत् प्रथमेहनियद्

र्यं नरेश्वस्याद्दशाहादिकमिति अथ चयनकालमाह दाहान्हादेवेति चयनं दिनं दाहान्हादेव गरणंपनतुमरणादिनात् अस्थिसंचयनं दाहात् मृताहस्तथा तिथात्यंगिरोवचनात् इदंचयनमादितः दाहदिनतः यानि चत्वारि दिनानि तेषां चतुर्णां दिवसानां मध्ये एक स्मिन्दिने दाहतः सप्तमेवाह नि नवमेवा कार्य मिति शेषः तथा च संवर्तः प्रथमे ह्नि तृतीये वा सप्तमे नवमे पि वा अस्थिसंचयनं कार्यं दिने च गोत्रजैः सहेति स्मृत्यंतरं चाद्दितीयेत्वस्थिसंचयनं इति विस्मरितिचतुर्थे दिवसेऽस्थिसंचयनं कुर्यात् तेषां च गंगाभसि क्षिपेदिति २८ अथ वनादिविधिमेकोनत्रिंशेनाह वर्षीयसीति वर्षीयसि वृद्धे उक्तऋतेसंस्थितेसति तु पुनःसूतिकांतेदश

दाहान्हेदेवगरणंपचयनस्मिमिदंचादितोन्हा चतुर्णामेकस्मिन्सप्तमेवाह निनवमस्मिन्वानुपेतेतुनैतत् २८ वर्षी
यस्यृतेतूपरिवपननखच्छेदनंसूतकांतेमध्येवाकेचिदूचुः पित्रपरमगुरुष्वेववापादिनित्यं अत्रस्मार्त्तेशुभा भा
थेंभणितमभणितंस्वस्वशाखेविदित्वाकृत्वारानानिदद्यादशुभभयमिदेभ्यःसुभार्थं २९ मेहनिउपरिवपनं
नखच्छेदनंचकनीयोसःकुर्यादितिशेषः॥उपरिवपनंउद्धृकेशश्मश्रुवपनंवा अथवाकेचिन्मध्येआशौचमध्येद्वितीयेतृतीयेपंच
मेसप्तमेवाह्निकर्त्तव्यमित्यूचुः तथा चदेवलः।दशमेहनिसप्तमेवास्तानंन्यामाहुर्हिभेवेनातत्रत्याज्यानिवासांसिकेशश्मश्रूनखा
निचेति॥तथा स्मृत्यंतरमपिद्वितीयेहनिकर्त्तव्यंक्षुरकर्मप्रयत्नतः तृतीयेपंचमेवापि सप्तमेवाथवानतइतिवपननिमित्तविशेषेण॰
णावश्यकतामाहपित्रपरमगुरुष्वेववापादिनित्यमितिएष्वेवसंस्थितेषुवा पोवपनंतरादिकर्मनित्यमावश्यकं पुत्रादीनां॰ २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि॰ध
टी॰
१७

तरत्वेतिभावः।तदुक्तंयोगिनाज्ञानेगंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृते॥ अथानकालेसोमेचवपनंसप्तमेऽहनीतिमिति॥सूतकांतेय
त्कर्त्तव्यंतदाह अत्रेति। अत्रयत्स्मार्तैकर्त्तव्यतयाभणितंउक्तंयच्चनोक्तंतत्सर्वंस्वशाखयातोविदित्वा अनंतरंकृत्वाचस्नात्वायथाद
शुभमयमिदंत्रशुभमयनाशनायशुभमाप्तयेचभूसुरेभ्योविप्रेभ्योदानंदद्यादित्येतत्सप्तं २९ अथशवंदग्ध्वाआगतानांप्रेतस्थ
हप्रवेशनविधिंत्रिंशेनसूतेनाहदत्वेति सपिंडाःश्वोक्ताः।तथापरशववहनस्नापकाःअसपिंडाश्चसर्वेपिंडंदत्वादत्तेपिंडेतद्देशम

दत्वापिंडंसपिंडाःपरशववहनाःस्नापकाश्चत्रजित्वातद्देशमद्वारिचास्मप्रशमितमनसोनिंबपत्रंविदश्य
आचम्याग्निंबहवोकुरुवरवृषभानस्तानगोमयेचस्पृष्ट्वासिद्धार्थतैलानय दत्वदिपदंन्यस्यसर्वेविशेयुः
३० इत्याशौचत्रिंशत्श्लोकीसमाप्ता ॥ अस्यप्रेतस्यसंबंधिगृहंव्रजित्वा अस्यवेश्मनोद्वारिप्रशस्तप्रशमितमनसः
सावहितचित्तास्तःनिंबपत्रंविदश्यचचिंत्वापश्चाद्दाचम्यानंतरंअग्निंसभृतीन्प्रसिद्धान्स्पृष्ट्वास्वदिपदंचन्यस्यदत्वाग्रहंप्र
विशेयुरितिसंबंधःतथाचस्मृतिः॥इतिसंस्मृत्यगच्छेयुर्हवालपुरःसराः विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः।आचम्या॥
ग्न्यादिसविलंगोमयंगौरसर्षपान्॥प्रविशेयुस्समालभ्य कृत्वाश्मनिपदंशनैरिति ३० इतित्रिंशत्श्लोकीभाष्यंसमाप्तम् ॥ श्री
संवत१९१९मीतीकुत्रस्थुदिकाशीप्रेहरनाथयनचौबेकीहाछपीपोथीनश्लोकीःलीषामहीपनाथयनपांडेछपनेवालेकानामश्रमर॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति त्रिंशत्श्लोकीटीकासमेतः समाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.06.20 13:39
,TRANSFERRED=2020/06/02 at 13:44:53
,PAGES=35
,TYPE=STD
,NAME=S0003050
,Book Name=M-2969-SHATSLOKI DHARAM SHASTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection